# DashamahavidyAstotram

# દશમહાવિદ્યાસ્તોત્રમ્

## Document Information

Text title : DashamahavidyAstotram

File name : dashamahAvidyAstotra.itx

Category : devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : NA

Proofread by : NA, Avinash Sathaye sohum at ms.uky.edu

Description-comments : Mundamala tantra 15th PaTala verses 28-54

Latest update : November 22, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 22, 2023

*sanskritdocuments.org*

# દશમહાવિદ્યાસ્તોત્રમ્

શ્રીપાર્વત્યુવાચ -
નમસ્તુભ્યં મહાદેવ! વિશ્વનાથ ! જગદ્ગુરો ! ।
શ્રુતં જ્ઞાનં મહાદેવ ! નાનાતન્ત્ર તવાનનત્ ॥

ઇદાનીં જ્ઞાનં મહાદેવ ! ગુહ્યસ્તોત્રં વદ પ્રભો ! ।
કવચં બ્રૂહિ મે નાથ ! મન્ત્રચૈતન્યકારણમ્ ॥

મન્ત્રસિદ્ધિકરં ગુહ્યાદ્ગુહ્યં મોક્ષૈધાયકમ્ ।
શ્રુત્વા મોક્ષમવાપ્નોતિ જ્ઞાત્વા વિદ્યાં મહેશ્વર ! ॥

શ્રી શિવ ઉવાચ -
દુર્લભં તારિણીમાર્ગં દુર્લભં તારિણીપદમ્ ।
મન્ત્રાર્થં મન્ત્રચૈતન્યં દુર્લભં શવસાધનમ્ ॥

શ્મશાનસાધનં યોનિસાધનં બ્રહ્મસાધનમ્ ।
ક્રિયાસાધનકં ભક્તિસાધનં મુક્તિસાધનમ્ ॥

તવ પ્રસાદાદ્દેવેશિ! સર્વાઃ સિદ્ધ્યન્તિ સિદ્ધયઃ ।

ૐ નમસ્તે ચણ્ડિકે ચણ્ડિ ચણ્ડમુણ્ડવિનાશિનિ ।
નમસ્તે કાલિકે કાલમહાભયવિનાશિનિ ॥ ૧॥

શિવે રક્ષ જગદ્ધાત્રિ પ્રસીદ હરવલ્લભે ।
પ્રણમામિ જગદ્ધાત્રીં જગત્પાલનકારિણીમ્ ॥ ૨॥

જગત્ ક્ષોભકરીં વિદ્યાં જગત્સૃષ્ટિવિધાયિનીમ્ ।
કરાલાં વિકટાં ઘોરાં મુણ્ડમાલાવિભૂષિતામ્ ॥ ૩॥

હરાર્ચિતાં હરારાધ્યાં નમામિ હરવલ્લભામ્ ।
ગૌરીં ગુરુપ્રિયાં ગૌરવર્ણાલઙ્કારભૂષિતામ્ ॥ ૪॥

હરિપ્રિયાં મહામાયાં નમામિ બ્રહ્મપૂજિતામ્ ।

સિદ્ધાં સિદ્ધેશ્વરીં સિદ્ધવિદ્યાધરઙ્ગણૈર્યુતામ્ ॥ ૫॥

મન્ત્રસિદ્ધિપ્રદાં યોનિસિદ્ધિદાં લિઙ્ગશોભિતામ્ ।
પ્રણમામિ મહામાયાં દુર્ગાં દુર્ગતિનાશિનીમ્ ॥ ૬॥

ઉગ્રામુગ્રમયીમુગ્રતારામુગ્રગણૈર્યુતામ્ ।
નીલાં નીલઘનશ્યામાં નમામિ નીલસુન્દરીમ્ ॥ ૭॥

શ્યામાઙ્ગીં શ્યામઘટિતાં શ્યામવર્ણવિભૂષિતામ્ ।
પ્રણમામિ જગદ્ધાત્રીં ગૌરીં સર્વાર્થસાધિનીમ્ ॥ ૮॥

વિશ્વેશ્વરીં મહાઘોરાં વિકટાં ઘોરનાદિનીમ્ ।
આદ્યામાદ્યગુરોરાદ્યામાદ્યનાથપ્રપૂજિતામ્ ॥ ૯॥

શ્રીં દુર્ગાં ધનદામન્નપૂર્ણાં પદ્માં સુરેશ્વરીમ્ ।
પ્રણમામિ જગદ્ધાત્રીં ચન્દ્રશેખરવલ્લભામ્ ॥ ૧૦॥

ત્રિપુરાં સુન્દરીં બાલામબલાગણભૂષિતામ્ ।
શિવદૂતીં શિવારાધ્યાં શિવધ્યેયાં સનાતનીમ્ ॥ ૧૧॥

સુન્દરીં તારિણીં સર્વશિવાગણવિભૂષિતામ્ ।
નારાયણીં વિષ્ણુપૂજ્યાં બ્રહ્મવિષ્ણુહરપ્રિયામ્ ॥ ૧૨॥

સર્વસિદ્ધિપ્રદાં નિત્યામનિત્યાં ગુણવર્જિતામ્ ।
સગુણાં નિર્ગુણાં ધ્યેયામર્ચિતાં સર્વસિદ્ધિદામ્ ॥ ૧૩॥

વિદ્યાં સિદ્ધિપ્રદાં વિદ્યાં મહાવિદ્યાં મહેશ્વરીમ્ ।
મહેશભક્તાં માહેશીં મહાકાલપ્રપૂજિતામ્ ॥ ૧૪॥

પ્રણમામિ જગદ્ધાત્રીં શુમ્ભાસુરવિમર્દિનીમ્ ।
રક્તપ્રિયાં રક્તવર્ણાં રક્તબીજવિમર્દિનીમ્ ॥ ૧૫॥

ભૈરવીં ભુવનાં દેવીં લોલજિહ્વાં સુરેશ્વરીમ્ ।
ચતુર્ભુજાં દશભુજામષ્ટાદશભુજાં શુભામ્ ॥ ૧૬॥

ત્રિપુરેશીં વિશ્વનાથપ્રિયાં વિશ્વેશ્વરીં શિવામ્ ।
અટ્ટહાસામટ્ટહાસપ્રિયાં ધૂમ્રવિનાશિનીમ્ ॥ ૧૭॥

કમલાં છિન્નભાલાઞ્ચ માતઙ્ગીં સુરસુન્દરીમ્ ।
ષોડશીં વિજયાં ભીમાં ધૂમાઞ્ચ વગલામુખીમ્ ॥ ૧૮॥

સર્વસિદ્ધિપ્રદાં સર્વવિદ્યામન્ત્રવિશોધિનીમ્ ।
પ્રણમામિ જગત્તારાં સારાઞ્ચ મન્ત્રસિદ્ધયે ॥ ૧૯॥

ઇત્યેવઞ્ચ વરારોહે સ્તોત્રં સિદ્ધિકરં પરમ્ ।
પઠિત્વા મોક્ષમાપ્નોતિ સત્યં વૈ ગિરિનન્દિનિ ॥ ૨૦॥

કુજવારે ચતુર્દશ્યામમાયાં જીવવાસરે ।
શુક્રે નિશિગતે સ્તોત્રં પઠિત્વા મોક્ષમાપ્નુયાત્ ॥

ત્રિપક્ષે મન્ત્રસિદ્ધિ સ્યાત્સ્તોત્રપાઠાદ્ધિ શંકરિ ।
ચતુર્દશ્યાં નિશાભાગે નિશિ ભૌમેઽષ્ટમીદિને ॥

નિશામુખે પઠેત્સ્તોત્રં મન્ત્ર સિદ્ધિમવાપ્નુયાત્ ।
કેવલં સ્તોત્રપાઠાદ્ધિ તન્ત્રસિદ્ધિરનુત્તમા ।
જાગર્તિ સતતં ચણ્ડી સ્તવપાઠાદ્ભુજઙ્ગિની ॥

(કાલી તારા મહાવિદ્યા ષોડશી ભુવનેશ્વરી ।
ભૈરવી છિન્નમસ્તા ચ વિદ્યા ધૂમવતી તથા ॥

બગલા સિદ્ધવિદ્યા ચ મતઙ્ગી કમલાત્મિકા ।
એતા દશમહાવિદ્યાઃ સિદ્ધ્યવિદ્યાઃ પ્રકીર્તિતાઃ ॥)

ઇતિ મુણ્ડમાલાતન્ત્રોક્ત પઞ્ચદશપટલાન્તર્ગતં
દશમહાવિદ્યાસ્તોત્રં સમ્પૂર્ણમ્ ॥

(એકાદશપટલે મહાવિદ્યાસ્તોત્રમ્)

NA

Proofread by Avinash Sathaye sohum at ms.uky.edu

*DashamahavidyAstotram*

pdf was typeset on November 22, 2023

Please send corrections to *sanskrit@cheerful.com*